# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०३)

## २२.१०.२०१२

# पुनरावर्तनम्

- स्त्रियाम्
  - सत्त्वरजस्तमोगुणानाम् उपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्, स्थितिमात्रं नपुंसकम् ।
  - लिङ्गम् अर्थनिष्ठम् ।
  - लिङ्गं प्रातिपदिकार्थः – स्त्रीप्रत्ययाः द्योतकाः ।
- अजाद्यतष्टाप्
  - औत्सर्गिकं सूत्रम् ।
  - अदन्तात् टापः अपवादत्वेन ङीप्-ङीषौ, तयोः अपवादः अजादिगणे पाठः ।

- वार्तिकानि
  - सम्भस्त्राजिनशणपिण्डेभ्यः फलात् ।
  - सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् ।
  - शूद्रा चामहत्पूर्वा जातिः ।
  - मूलान्नञः ।

# ३०६. ऋन्नेभ्यो ङीप् (४.१.५)

- पदद्वयम् । ऋत्-नेभ्यः, ङीप् ।
- ‘ङ्याप्प्रातिपदिकात्’ (४.१.१) इति, ‘स्त्रियाम्’ (४.१.३) इति च अधिक्रियेते ।
- ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात् ।
- कर्त्री ।
- दण्डिनी ।

# ४५५. उगितश्च (४.१.६)

- पदद्वयम् । उगितः, च ।
- ‘ङ्याप्प्रातिपदिकात्’ (४.१.१) इति, ‘स्त्रियाम्’ इति च अधिक्रियते । ‘ऋन्नेभ्यो ङीप्’ (४.१.५) इत्यतः ‘ङीप्’ इति अनुवर्तते ।
- उगिदन्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात् ।
- उगितश्च इति ।
- भवती ।
- भवतीति ।
- पचन्ती ।
- ‘शप्श्यनोर्नित्यम्’ (७.१.८१) इति नुम् ।
- पचन्तीति ।

- ‘उगिद्चाम्..’ इति सूत्रे अज्ग्रहणेन ‘धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेव’ इति नियम्यते ।
- तेनेह न ।
- उखास्रत् ।
- क्विप् । ‘अनिदितां हल उपधायाः क्ङिति’ (६.४.२४) इति नलोपः ।
- उखेति ।
- पर्णध्वत् ।
- अञ्चतेस्तु स्यादेव ।
- प्राची । प्रतीची ।
- प्राचीति ।

- प्र + अन्चु गतिपूजनयोः
- प्र अन्च् (क्विन्) व् (ऋत्विग्..’ – ३.२.५९)
- प्र अच् व्        (‘अनिदितां हल..’ – ६.३.२६)
- प्र अच्        (‘वेरपृक्तस्य’ – ६.१.६७)
- प्र अच्  (ङीप्) ई  (‘उगितश्च’ – ४.१.६)
- प्र च् ई        (‘अचः’ – ६.४.१३८)
- प्राची        (‘चौ’)

# ४५६. वनो र च (४.१.७)

- पदत्रयम् । वनः, र, च ।
- 'ङ्याप्प्रातिपदिकात्' (४.१.१) इति, 'स्त्रियाम्' इति च अधिक्रियते । 'ऋन्नेभ्यो ङीप्' (४.१.५) इत्यतः 'ङीप्' इति अनुवर्तते ।
- वन्नन्तात् तदन्ताच्च प्रातिपदिकात् स्त्रियां ङीप् स्यात्, रश्चान्तादेशः ।
- वन्निति ङ्वनिप्क्वनिब्वनिपां सामान्यग्रहणम् ।
- 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' (प) ।
- तेन प्रातिपदिकविशेषणात् तदन्तान्तमपि लभ्यते ।

- सुत्वानम् अतिक्रान्ता अतिसुत्वरी ।
- सुत्वानमिति ।
- अतिधीवरी ।
- अतिधीवरीति ।
- शर्वरी ।
- शर्वरीति ।

# वनो न हश इति वक्तव्यम् (वा)

- हशन्ताद् धातोः विहितो यो वन्, तदन्तात् तदन्तान्ताच्च प्रातिपदिकात् ङीप् रश्च न इत्यर्थः ।
- ‘ओणृ अपनयने’ वनिप्, ‘विड्वनोः..’ इत्यात्त्वम् ।
- अवावा ब्राह्मणी ।
- अवावेति ।
- राजयुध्वा ।
- राजयुध्वेति ।

# ‘बहुव्रीहौ वा’ (वा)

- बहुव्रीहिसमासे ङीब् रश्च विकल्प्यते ।
- बहुव्रीहौ इति ।
- बहुधीवरी । बहुधीवा ।
- पक्षे डाब्वक्ष्यते ।

# ४५७. पादोऽन्यतरस्याम् (४.१.८)

- पदद्वयम् । पादः, अन्यतरस्याम् ।
- 'ङ्याप्प्रातिपदिकात्' (४.१.१) इति, 'स्त्रियाम्' इति च अधिक्रियते । 'ऋन्नेभ्यो ङीप्' (४.१.५) इत्यतः 'ङीप्' इति अनुवर्तते ।
- पाच्छब्दः कृतसमासान्तः तदन्तात् प्रातिपदिकाद् ङीब् वा स्यात् ।
- द्विपदी, द्विपाद् ।
- द्विपदीति ।

# ४५८. टाबृचि (४.१.९)

- पदद्वयम् । टाब्, ऋचि ।
- ‘ङ्याप्प्रातिपदिकात्’ (४.१.१) इति, ‘स्त्रियाम्’ इति च अधिक्रियते । ‘पादोऽन्यतरस्याम्’ (४.१.८) इत्यतः ‘पादः’ इति अनुवर्तते ।
- ऋचि वाच्यायां पादन्तात् टाप् स्यात् ।
- द्विपदा ऋक् ।
- एकपदा ।
- एकपदेति ।